CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 538

Title Kasika Vritti

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 538 Subject: Grammar.

Title: Kāśikā vritti

Author: Vāmana Scribe: —

Date of the work: — Date of the Ms.: V.S. 8088

Place of the work: — Place of the Ms.: —

Size: 9.3" by 4.2" Extent: 217 to 236 foil

Language: Sanskrit. Script: Devanāgari

Remarks: —.

॥श्रीगणेशाय नमः॥ ॥धातुसंबंधे प्रत्ययाः॥ १ ॥धात्वर्थे धातुशब्दो वर्त्तते। धात्वर्थानां
संबंधो धातुसंबंधः। विशेषणविशेष्यभावः। तस्मिन् सति। अयथाकालोक्ता अपि प्रत्ययाः सा
धवो भवंति। अग्निष्टोमयाजी अस्य पुत्रो जनिता। कृतः कटः श्वो भविता। भाविकृत्यमासीत्। अग्निष्टो
मयाजीति भूतकालः। जनितेति भविष्यत्कालः। तत्र भूतकालो भविष्यत्कालेनाभिसंबध्यमानः
साधुर्भवति। विशेषणं गुणत्वाद्धि विशेष्यकालमनुरुध्यते। तेन विपर्ययो न भवति। प्रत्ययाधिकारे पुनः
प्रत्ययग्रहणं अधात्वधिकारविहिता। अपि प्रत्ययास्त्र हिताः। धातुसंबंधे सति कालभेदे सा
धवो यथा स्युरिति। गोमान् आसीत्। गोमान् भविता। गावो विद्यंते यस्य वर्त्तमानकालविहि
तो मतुप्। आसीत् भवितेति संबंधात् अतीते भविष्यति च साधुर्भवति॥ २॥ क्रियासमभिहारे लोट् लो
टो हिस्वौ वा च तध्वमोः॥ ॥ धातुसंबंध इति निवृत्तं। पौनःपुन्यं भृशार्थो वा क्रियासमभिहारः। १
प्रकृत्यर्थविशेषणं चैतत् समभिहारविशिष्टक्रियावचनाद्धातोः लोट्प्रत्ययो भवति। सर्वेषु

निहारे भवति। यङ्प्रत्ययः। पुनरस्मिन्नेवार्थे विधीयमानः। स्वयमेवशक्तत्वान्नापेक्ष्यते द्विर्वचनं।
॥ ॥समुच्चयेऽन्यतरस्यां॥ ३ ॥अनेकक्रियाध्याहारः समुच्चयः समुच्चीयमानक्रियावचनाद्धातो
रन्यतरस्यां लोट् प्रत्ययो भवति। तस्य लोटो हिस्वावादेशौ भवतः। तध्वमोश्च तत्तवं भवतः। भ्राष्ट्रम
टमठमटखदूरमटस्थाल्यपिधानमटेत्येवायमटति। इमावटतः। इमेऽटंति। भ्राष्ट्रमटमठ
मटखदूरमटस्थाल्यपिधानमटेत्येवं त्वमटसि। युवामटथः। यूयमटथ। अथवा भ्राष्ट्रमट
मटतमटमतखदूरमटतस्थाल्यपिधानमटतेत्येवं यूयमटथ। भ्राष्ट्रमटमठमटखदूरमट
स्थाल्यपिधानमटेत्येवाहमटामि। आवामटावः। वयमटामः। अथवा भ्राष्ट्रमटतिमठमटति
खदूरमटतिस्थाल्यपिधानमटतीत्येवायमटति। इमावटतः। इमेऽटंति। भ्राष्ट्रमटसिमठ
मटसिखदूरमटसिस्थाल्यपिधानमटसीत्येवायमटति। इमावटतः। इमेऽटंति। भ्राष्ट्रमट
सिमठमटसिखदूरमटसिस्थाल्यपिधानमटसीति त्वमटसि। युवामटथः। यूयमटथ। २

कालेषु। सर्वलकाराणामपवादः। तस्य लोटो हिस्वौ इत्येतावादेशौ भवतः। तध्वंभाविनस्तु वा भवतः
योगविभागस्वात्मकर्त्तव्यं। क्रियासमभिहारे लोट् भवति। ततो लोटो हिस्वौ। लोडित्येव। लोडर्थ
मात्रे हिस्वौ न भवत इत्यर्थः। तेन परस्मैपदात्मनेपदत्वं तेदेन व्यवतिष्ठे। ते। तिङ्त्वं च न भवति। लुनीहि लु
नीहीत्येवायं लुनाति। इमौ लुनीतः। इमे लुनंति। लुनीहि। लुनीहि। त्वं लुनासि। युवां लुनीथः। यूयं
लुनीथ। अथवा लुनीत लुनीतेत्येवाहं लुनामि। आवां लुनीवः। वयं लुनीमः। भूते लुनीहि लुनीहि
त्येवायं अलावीत्। अलाविष्टां। अलाविषुः। एवं मध्यमोत्तमयोरप्युदाहार्यं। भविष्यति। लुनीहि लु
नीहीत्येवायं लविष्यति। लविष्यतः। लविष्यंति। एवं मध्यमोत्तमयोरप्युदाहार्यं। अधीष्वाधीष्वेत्ये
वायमधीते। इमावधीयाते। इमे अधीयते। अधीष्वाधीष्वेत्येव त्वमधीषे। युवामधीयाथे। यूयमधीध्वे।
अथवा अधीध्वमधीध्वमित्येव यूयमधीध्वे। अधीष्वाधीष्वेत्येवाहं अधीये। आवामधीवहे। वयम
धीमहे। एवं सर्वलकारेषूदाहार्यं क्रियाहारासमभिव्यक्तौ द्विर्वचनमयंलोऽपेक्षते। क्रियासम

लुनीतीति विच्छित्तिनैत्यनुप्रयुज्यते। अधीष्वाधीष्वेत्येवायमधीते एवं तातिनानुप्रयुज्यते॥ ॥समु
च्चये सामान्यवचनस्य॥ ५ ॥ द्वितीये लोड्विधाने समुच्चये सामान्यवचनस्य धातोरनुप्रयोगः क
र्तव्यः। ओदनं भुंक्ष्व। सक्तून् पिब। धानाः खाद इत्येवायमभ्यवहरति। अर्थविशेषात्तु प्रयोगनि
वृत्त्यर्थं वचनं। लाघवं च लौकिके शब्दव्यवहारे नाद्रियते। ग्राममट मठमट खट्वामट स्थाल्यपि
धानमटेत्येवायमटतीत्यत्रापि कारकभेदात् क्रियाभेदे सति सामान्यवचनतासंभवत्येव॥ छं
दसि लुङ्लङ्लिटः॥ ६॥ धातुसंबंध इति वर्त्तते॥ ॥छंदसि विषये सर्वेषु कालेषु धातुसं
बंधे लुङ्लङ्लिटः प्रत्यया भवंति। अन्यतरस्यामिति निवृत्तं। तेभ्योऽपि लकारा यथाप्राप्तं भवंत्येव।
लुङ्। शकलांगुष्ठकोऽकरत्। अहं तेभ्योऽकरं नमः। लङ्। अग्निमद्य होतारमवृणीतायं यजमानः।
लिट्। अद्यममार। अद्यममार। अद्य म्रियते॥ ॥लिङर्थे लेट्॥ ७॥ छंदस्यन्यतरस्यामि ३
तिवर्त्तते। लिङर्थे लिट्॥ ८॥ विधायते विध्यादिहेतुहेतुमतोर्लिङित्येवमादिश्च। तत्र छंद

ऋष्टमटामिमवूमटामिस्वहूरमटामिस्वास्यपिधानमटामित्येवाहमटामि। आवामटाम
वयमटामः। छंदोधाध्व व्याकरणमधाध्व। निरुक्तमधाध्वेत्येवायूयामधाते। इमावधीयाते। इमे
अधीयते। छंदोधीष्व व्याकरणमधीष्व निरुक्तमधीष्वेत्येवत्वमधीष्वेत्येवयुवामधीयाथे। यू
यमधीध्वे। अथवा छंदोधीध्वं व्याकरणमधीध्वं निरुक्तमधीध्वमित्येवाहवमधीये। आवाम
धीमहे। वयमधीमहे। अथवा छंदोधाते व्याकरणमधाते निरुक्तमधातेइत्येवायमधाते
इमावधीयाते। इमे अधीयते। छंदोधीषे व्याकरणमधीषे निरुक्तमधीषेइत्येवत्वमधीये यु
वामधीयाथे। यूयमधीध्वे। छंदोधीये व्याकरणमधीये निरुक्तमधीयेइत्येवाहमधीये। आवा
मधीमहे। वयमधीमहे॥ ॥यथाविध्यनुप्रयोगःपूर्वस्मिन्॥४॥ पूर्वस्मिन्लोड्विधानेय
थाविध्यनुप्रयोगो भवति। यस्माद्धातोर्लोड्विहितः सएवानुप्रयोक्तव्यः। धात्वसंबंधेप्रत्यय
विधानादनुप्रयोगः सिद्धएवयथाविध्यर्थंतुवचनं। तथाचैवोदाहृतं। लुनीहि लुनीहीत्येवायं

काशिका। अ३पा४

२२०

दिश्यते। अनिर्दिष्टार्थाः प्रत्ययाःस्वार्थेभवंति। तुमर्थेनिवस्वार्थेधात्वर्थानां भावएव। से
सेन्। वक्षेरायः। तावामेषेरथानां। असे असेन्। क्रत्वेदक्षायजीवसे स्वरविशेषः। क्से। कसेन्।
प्रेषेभगाय। श्रियसे अध्यै। अध्यैन्। कर्मकामस्तुण्ठपबरध्यै। स्वरविशेषः कध्यै कध्यैन्इन्द्राग्नी
आहुवध्यै। पिध्यै शध्यै। शध्यैन्पिबध्यै। सहमादयध्यै। तवै। सोममिन्द्राय पातवै। तवेङ्।
दशमे मासि सूतवे। तवेन्। वसुहर्त्रवे कर्त्तवे हर्त्तवे॥१०॥ प्रयैरोहिष्यै अव्यथिष्यै।
तुमर्थेछंदसीत्येव। प्रयै। रोहिष्यै। अव्यथिष्यै इत्येतेशब्दानिपात्यंते छंदसिविषये प्रसर्वस्य
यातेः कैप्रत्ययः। प्रयैदेवेभ्यःपयाध्वं। रुहेः इष्यैप्रत्ययः। अपामोषधीनांरोहिष्यै। रोहणाय। नञ्पूर्व
स्य व्यथेरिष्यैः अव्यथिष्यै। अव्यथनाय॥ ॥दृशेविख्येच॥११॥ तुमर्थे छंदसीत्येव। दृशेविख्ये।
इत्येतौ छंदसि विषये निपात्येते। दृशेः केप्रत्ययः। दृशेविश्वायसूर्यं। दृशे विख्ये त्वा हरामि ४
विख्यातुं॥ ॥शकिणमुल्कमुलौ॥१२॥ तुमर्थे छंदसीत्येव। शक्नोतावुपपदे छंदसि

।स्मिविषयेन्यतरस्यांलेट्प्रत्ययोभवति।जोषिषत्।तारिषत्।मंदिषत्।तेनानिषत्।तद्विप
पतातिविद्युत्।उदधिंच्यावयाति।। ।।उपसंवादाशंकयोश्च।।८।।उपसंवादः परिभाषणं।
कर्त्तव्येपणबंधः।यदिमेभवा।निदंकुर्याद्हमपितेइदंदास्यामीति।कारणतःकार्यानुसारेण
तर्कःउत्प्रेक्षा-आशंका।उपसंवादेआशंकायां।उपसंवादेआशंकायांचगम्यमानायांछंदसि
विषयेलेट्प्रत्ययोभवति।उपसंवादेतावत्।अहमेवपशूनामीशै।पृथग्नाएववोग्र
ह्यागृह्याते।मदेवत्यान्येववः।पात्राण्युच्यते।आशंकायां।नेज्जिह्मायंतोनरकंपताम।जिह्मा
चरणेनकापातआशंक्यते।लिङर्थेत्यस्वायंनित्यार्थवचनं।सर्वस्मिन्सूत्रेन्यतरस्यामितिवर्त्तते।
।। ।।तुमर्थेसेसेनसेअसेन्क्सेकसेनध्यैअध्यैन्कध्यैकध्यैन्शध्यैशध्यैन्तवैतवेङ्तवेनः।
।। ।।छंदसीत्येव।।तुमुनोर्थस्तुमर्थः।तत्रच्छंदसिविषयेधातोःसेयादयःप्रत्ययाभवंति।तु
मर्थोभावःकथंज्ञायते।वचनसामर्थ्यात्तावत्कर्तुरयंहास्यते।नवान्यस्मिन्नर्थेतुमुन्ना

का० २२१ अ३पा४

ष्यामित्यर्थः।। ।।भावलक्षणेस्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन्।।१६।।कृत्यार्थइतिनिवृत्तं।तुमर्थ
इत्यनुवर्त्तते।प्रकृत्यर्थविशेषणं।भावलक्षणग्रहणं।भावोलक्ष्यतेयेनतस्मिन्नर्थेवर्त्तमानेभ्यःस्थादिभ्यो
धातुभ्यःछंदसिविषयेतुमर्थेतोसुन्प्रत्ययोभवति।स्थाः-आसंस्थातोर्वेद्यांमिदंति।आसमाप्तेःसीदं
तीत्यर्थः।इण्।पुरासूर्यस्योदेतोराधेयः।कृञ्।पुरावत्सानामपाकर्त्तोः।वदि।पुराप्रवदितोरग्नौप्रहोतव्यं।
चरि।पुराप्रचरितोराग्नीध्रेहोतव्यं।हु।आहोतोरप्रमत्तस्तिष्ठति।तमि।आतमितोस्तिष्ठति।जनि।आजनि
तोःसंभवामि।। ।।सृपितृदोःकसुन्।।१७।।भावलक्षणेछंदसीतिवर्त्तते।सृपितृदोर्धात्वोर्भावलक्षणेवर्त्त
मानयोश्छंदसिविषयेतुमर्थेकसुन्प्रत्ययोभवति।पुराक्रूरस्यविसृपोविरप्शिन्।पुराजत्रुभ्यआतृदः।
।। ।।अलंखल्वोःप्रतिषेधयोःप्राचांक्त्वा।।१८।।छंदसिभावलक्षणइतिनिवृत्तं।अलंखल्वोरिति
योःप्रतिषेधवाचिनोरुपपदयोःक्त्वाप्रत्ययोभवति।प्राचामाचार्याणांमतेन।अलंकृत्वा।खलुकृत्वा।अलं
वाग्रेकृत्वा।प्रतिषेधयोरितिकिम्।अलंकारः।अलंखल्वोरितिकिं।माकार्षीः।प्राचांग्रहणंविकल्पार्थं। ५

विषये तुमर्थे धातोर्णमुल्कमुल् इत्येतौ प्रत्ययौ भवतः॥ णकारो वृद्ध्यर्थः॥ ककारो गुणवृद्धिप्रति
षेधार्थः॥ लकारः स्वरार्थः॥ अग्निं वै देवा विभाजं नाशक्नुवन् विभक्तुमित्यर्थः॥ अपलुपं नाशक्नुवन्
अपलोप्तुमित्यर्थः॥ ॥ईश्वरे तोसुन्कसुनौ॥१३॥ तुमर्थे छंदसीत्येव। ईश्वरशब्द उपपदे छंदसि
विषये तुमर्थे धातोस्तोसुन्कसुन् इत्येतौ प्रत्ययौ भवतः॥ ईश्वरोऽभिचरितोः॥ अभिचरितुमित्यर्थः॥
ईश्वरो विलिखः॥ विलिखितुमित्यर्थः॥ ईश्वरो वितृदः॥ वितर्दितुमित्यर्थः॥ ॥कृत्यार्थे तवैकेन्केन्यत्वनः
॥१४॥ छंदसीत्येव। कृत्यानामर्थो भावकर्मणी इति तस्मिन् कृत्यार्थे छंदसि विषये। तवै। केन्। केन्य
त्वन् इत्येते प्रत्यया भवंति। अन्वेतवै। अन्वेतव्यं। परिधातवै। परिधातव्यं। परिस्तरितवै। परिस्तरितव्यं।
केन्। नावगाहे। नावगाहितव्यं। केन्य। दिदृक्षेण्यः। शुश्रूषेण्यः। दिदृक्षितव्यं। शुश्रूषितव्यं। त्वन्। कर्त्व
त्वं हविः। कर्तव्यं। तव्यादिसंज्ञेऽपि तवै विहितः एव तस्य तुमर्थादन्यत्र कारके विधिर्द्रष्टव्यः॥ ॥अ
वचक्षे च॥१५॥ कृत्यार्थे छंदसीत्येव। अवपूर्वाच्चक्षिङः एश्प्रत्ययो निपात्यते। नावचक्षे। नावख्यात

अभ्युद्गीरोद्गनेन। वासरूपविधिना वेत्यर्थः॥ ॥उदीचां माङो व्यतीहारे॥१९॥ क्त्वानुवर्त्तते। माङो धातोर्व्य
तीहारेऽर्थे वर्तमानादुदीचामाचार्याणां मतेन क्त्वाप्रत्ययो भवति। अपमित्य याचते। अपमित्याहरति।
अपूर्वकालत्वात् अप्राप्तः क्त्वा विधीयते। उदीचांग्रहणं तु यथाप्राप्तमपि भवति। याचित्वापमयते। हृत्वा
पमयते। मेङः क्त्वान्तस्यापनिर्देशः क्त्वोऽसापनार्थः। मानुबंधकरणमनेजंतत्वं भवतीति। तेन दाधाघ्वदाबिति
प्रतिषेधो घुसंज्ञायामपि भवति। परावरयोगे च॥२०॥ परावराभ्यां योगः परावरयोगः। परेण पूर्वस्य योगे गम्यमाने
अवरेण परस्य योगे गम्यमाने धातोः क्त्वाप्रत्ययो भवति। परेण तावत्। अप्राप्य नदीं पर्वतः स्थितः परं नदी
योगेन पर्वतो विशेष्यते। अवरयोगे अतिक्रम्य पर्वतं नदी स्थिता। अवरं पर्वतयोगेन नदी विशेष्यते॥ ॥
समानकर्तृकयोः पूर्वकाले॥२१॥ क्त्वानुवर्त्तते। समानः कर्ता ययोर्धात्वर्थयोः तत्र पूर्वकाले धात्वर्थे वर्तमाना
द्धातोः क्त्वाप्रत्ययो भवति। शक्तिशक्तिमतोर्भेदस्याविवक्षितत्वात् समानः कर्ता भवति। भुक्त्वा व्रजति। पी
त्वा व्रजति। द्विवचनं तंत्रं। बहुष्वपि भवति। स्नात्वा भुक्त्वा पीत्वा व्रजति। समानकर्तृकयोरिति किम्। भुक्त

का०

अ३पा४

२२२ वनिष्ठात्तरोव्रजति। देवदत्तः पूर्वकालत्वादितिकिं। भवति च जल्पति च। व्यादायस्वपिति। संमील्य हसत्यपरत्वं
स्यानं अपूर्वकालत्वात्॥ ॥आभीक्ष्ण्ये णमुल्च॥२२॥ समानकर्तृकयोः पूर्वकाल इत्येव। आभीक्ष्ण्यं
पौनःपुन्यं प्रकृत्यर्थविशेषणं चैतत्। आभीक्ष्ण्यविशिष्टेर्थे वर्तमानाद्धातोर्णमुल्प्रत्ययो भवति चका
रात् क्त्वा च। द्विर्वचनसहितौ क्त्वाणमुलौ आभीक्ष्ण्यं द्योतयतः। न केवलौ। आभीक्ष्ण्ये द्वे भवत इति द्विर्वच
नं। भोजं भोजं व्रजति। पायं पायं व्रजति। भुक्त्वा भुक्त्वा व्रजति। पीत्वा पीत्वा व्रजति॥ ॥न यद्यनाकां
क्षे॥२३॥ यच्छब्द उपपदे क्त्वाणमुलौ प्रत्ययौ न भवतः। अनाकांक्षे वाक्ये। यत्र तेन पूर्वोत्तरे क्रिये परतः
तद्वेद्वाक्यं नापरं किंचिदाकांक्षति। णमुलो लण्णंतरः। क्त्वा तु पूर्वयोगेपि विहितोपि प्रतिषिध्यते। यदयं तु
क्तेततः भवति। यदयमधीते ततः शेते। अनाकांक्ष इति किम्। यदयं भुक्त्वा व्रजति अधीत एव ततः
परं॥ ॥विभाषाग्रे प्रथमपूर्वेषु॥२४॥ आभीक्ष्ण्य इति नानुवर्तते। अग्रे प्रथम ६
इत्येतेषूपपदेषु समानकर्तृकयोः पूर्वकाले क्त्वाणमुलौ प्रत्ययौ भवतो विभाषा। अग्रे भुक्त्वा व्रजति

अग्रे भोजं व्रजति। प्रथमं भुक्त्वा व्रजति। प्रथमं भोजं व्रजति। पूर्वं भुक्त्वा व्रजति। पूर्वं भोजं व्रजति। विभाषाग्रहणेम
ताभ्यामन्यत्र अग्रादयोपि यथास्युरिति। अग्रे भुंक्ते ततो व्रजति। ननु च वासरूपेण भविष्यति। क्त्वाणमुलौ
यत्र सह विधीयेते। तत्र वासरूपविधिर्नास्तीत्येतदनेन ज्ञाप्यते। तेनाग्रे भोज डादयो न भवंति। उपप
दसमासः। कस्मान्न भवति। भुक्तं तत्रैवकारस्य प्रयोजनं। अमैवयत्तुल्यविधानमुपपदं तत्र समस्यते ना
न्यदिति॥ ॥कर्मण्याक्रोशे कृञः खमुञ्॥२५॥ कर्मण्युपपदे करोतेर्धातोः खमुञ् प्रत्ययो भवति
आक्रोशे गम्यमाने। चोरंकारमाक्रोशति। दस्युंकारमाक्रोशति। चोरोसि दस्युसीत्याक्रोशति।
चोरकरणमिह आक्रोशस्य पादनार्थमेव। भवसि चोरः क्षिपते॥ ॥स्वादुमि णमुल्॥२६॥
समानकर्तृकयोः पूर्वकाले कृञ इति चानुवर्तते। स्वादुमित्यर्थग्रहणं। स्वाद्वर्थेषूपपदेषु कृञः
णमुल् प्रत्ययो भवति। स्वादुंकारं भुंक्ते। संपन्नंकारं भुंक्ते। लवणंकारं भुंक्ते। स्वादुमिति मान्तं नि
पातनं मकारान्तत्वार्थं तस्य एवमकारार्थं दीर्घाभावार्थं च। अस्वाद्वीं स्वाद्वीं कृत्वा यवागूं भुंक्ते॥

स्वादुंकारंभुंक्ते।वासरूपेणक्त्वापिभवति।स्वादुंकृत्वाभुंक्ते।अमर्थाधिकाराच्चसर्वत्रैतेतावेप्रत्ययाः
यद्येवंस्वादुंकारंभुंक्तेदेवदत्त।इतिणमुलाकर्तुरनभिहितत्वात्कर्तरितृतीयाकस्मान्नभवतिभुजि
प्रत्ययेनाभिहितः।कर्त्तानियोऽस्मिन्प्रकरणेशक्तिशक्तिमतोर्भेदोविवक्ष्यतेसमानकर्तृकत्वंहिविरुध्यते।
प्रधानशक्त्यभिधानेगुणशक्तिरभिहितवत्प्रकाशते।।२६।।अन्यथैवंकथमित्थंसुसिद्धाप्रयोगश्चेत्।
।। ।।कृञइत्येव।अन्यथादिषूपपदेषुकृञोणमुल्प्रत्ययोभवति।सिद्धाप्रयोगश्चेत्करोति।कथंच
नरस्तौसिद्धाप्रयोगः।निरर्थकत्वान्नप्रयोगमर्हति।एवमेवप्रयुज्यते।अन्यथाभुंक्तेइति।यावानर्थः
प्रतीयतेतावान्येवान्यथाकारंभुंक्तेइतिगम्यते।अन्यथाकारंभुंक्तेएवंकारंभुंक्ते।कथंकारंभुंक्ते।
इत्थंकारंभुंक्ते।सिद्धाप्रयोगइतिकिं।अन्यथाकृत्वाशिरोभुंक्ते।यथातथयोरसूयाप्रतिवचने।
।।२८।।कृञःसिद्धाप्रयोगइत्येव।यथातथाशब्दयोरुपपदयोःकृञोधातोर्णमुल्प्रत्ययोभवति।अ ७
सूयोक्ष्येकिंतवानेन।असूयाप्रतिवचनइतिकिम्।यथाकृत्वाअहंभोक्ष्येतथाद्रक्ष्यसि।सिद्धाप्रयो

गइत्येव।यथाकृत्वाहंशिरोभोक्ष्येतथाकृत्वाहंभोक्ष्येकिंतवानेन।। ।।कर्मणिदृशिविदोःसाकल्ये।।२९।।क
र्मण्युपपदेसाकल्यविशिष्टेऽर्थेदृशिविदोर्धात्वोर्णमुल्प्रत्ययोभवति।कन्यादर्शंवरयति।सर्वाःकन्यावरयती
त्यर्थः।ब्राह्मणवेदंभोजयति।यंयंब्राह्मणंजानातिलभतेविचारयतिवातंसर्वंभोजयतीत्यर्थः।साकल्यइतिकिं।
ब्राह्मणंदृष्ट्वाभोजयति।। ।।यावतिविन्दजीवोः।।३०।।यावच्छब्दउपपदेविंदतेर्जीवतेश्चधात्वोर्णमुल्प्र
त्ययोभवति।यावद्वेदंभुंक्ते।यावल्लभतेतावद्भुंक्तइत्यर्थः।यावज्जीवमधीतेयावज्जीवतितावदधीतइत्यर्थः।
।। ।।चर्मोदरयोः।।३१।।पूरेःकर्मणीत्येव।चर्मोदरयोःकर्मवाचिनोरुपपदयोःपूरयतेर्धातोर्णमुल्प्रत्ययो
भवति।चर्मपूरंस्तृणाति।उदरपूरंभुंक्ते।। ।।वर्षप्रमाणऊलोपश्चास्यान्यतरस्यां।।३२।।कर्मणीत्येव।
कर्मण्युपपदेपूरयतेर्धातोर्णमुल्प्रत्ययोभवति।ऊलोपश्चास्यान्यतरस्यां।समुदायेनचेद्वर्षस्यप्रमाणमि
यत्तागम्यते।गोष्पदपूरंवृष्टोदेवः।गोष्पदप्रं।वृष्टोदेवः।सीतापूरंवृष्टोदेवः।सीताप्रंवृष्टोदेवः।अस्यग्रहणं
किं।उपपदस्यमाभूत्।मूषिकाबिलपूरंवृष्टोदेवः।मूषिकाबिलप्रंवृष्टोदेवः।। ।।चेलेक्नोपेः।।३३।।कर्मणी

त्येव। कूपिशाद्देउदनेव। अस्माद्धातोर्णमुल् चेलार्थेषूपपदेषु णमुल्प्रत्ययो भवति। वर्षप्रमाणे गम्यमाने। चेल
क्नोपं वृष्टो देवः। वस्त्रक्नोपं वृष्टो देवः॥ ॥निमूलसमूलयोः कषः॥ ३४॥ कर्मणीत्येव। निमूलसमूलयोः कर्म
वाचिनोरुपपदयोः कषेर्धातोर्णमुल् प्रत्ययो भवति। निमूलकाषं कषति। समूलकाषं कषति। निमूलं समूलं क
षतीत्यर्थः। इतः प्रभृति कषादिष्वनुप्रयोगं वक्ष्यति तत्र काषादिषु यथाविध्यनुप्रयोग इति। ३५। शुष्कचूर्णरूक्षे
षु पिषः। कर्मणीत्येव। शुष्कादिषूपपदेषु कर्म्मवाचिषु पिषेर्धातोर्णमुल् प्रत्ययो भवति। शुष्कपेषं पिनष्टि
शुष्कं पिनष्टीत्यर्थः। चूर्णपेषं पिनष्टि। कर्मवाचिषूपपदेषु। रूक्षपेषं पिनष्टि। रूक्षं पिनष्टीत्यर्थः॥ ॥समूलाकृ
तजीवेषु हन्कृञ्ग्रहः॥ ३६॥ कर्मणीत्येव। समूलाकृतजीवशब्देषु कर्मवाचिषूपपदेषु हन्कृञ्ग्रह
इत्येतेभ्यो यथासंख्यं णमुल् प्रत्ययो भवति। समूलघातं हंति। अकृतकारं करोति। जीवग्राहं गृह्णाति॥ ॥ ८
करणे हनः॥ ३७॥ करणउपपदे हंतेर्धातोर्णमुल् प्रत्ययो भवति। पाणिघातं भूमिं हंति। पाणिना हंतीत्यर्थः।
पादघातं वेदिं हंति। पादेन हंतीत्यर्थः। हिंसार्थानां च समानकर्मकाणामिति णमुलं वक्ष्यति। अहिंसार्थोऽय

मारंभः। नित्यसमासार्थो वा। यथाविध्यनुप्रयोगार्थश्च। सर्वविभक्तिविधेन। हि हंतेर्हिंसार्थस्यापि प्रत्ययोऽनेनैवेष्यते।
असिघातं हंति। शरघातं हंतीति। स्नेहने पिषः॥ ३८॥ करणइत्येव। स्निह्यतेऽनेनेति स्नेहनं। स्नेहनवाचिनि करणउपप
दे पिषेर्धातोर्णमुल् प्रत्ययो भवति। उदपेषं पिनष्टि। तैलपेषं पिनष्टि। तैलेन पिनष्टीत्यर्थः। घृतपेषं पिनष्टि। घृते
न पिनष्टीत्यर्थः॥ ॥हस्ते वर्त्तिग्रहोः॥ ३९॥ करणइत्येव। हस्त इत्यर्थग्रहणं। वर्त्तिर्ण्यन्तः। हस्तवाचिनि करणे
उपपदे वर्त्तयतेर्ग्रहेश्च धातोर्णमुल् प्रत्ययो भवति। हस्तवर्त्तं वर्त्तयति करणइत्येव। हस्त इत्यर्थग्रहणं। करवर्त्तं पाणि
वर्त्तं। ग्रह हस्तग्राहं गृह्णाति। हस्तेन गृह्णातीत्यर्थः। करग्राहं। पाणिग्राहं॥ ॥स्वे पुषः॥ ४०॥ करणइत्येव।
हस्त इत्यर्थग्रहणं। स्ववाचिनि करण उपपदे पुषेर्धातोर्णमुल् प्रत्ययो भवति। आत्मात्मीयज्ञातिधनवाची स्वश
ब्दः। स्वपोषं पुष्णाति। गोपोषं पुष्णाति। महिषीपोषं पुष्णाति। मातृपोषं पुष्णाति। पितृपोषं पुष्णाति। रैपोषं
पुष्णाति। धनपोषं पुष्णाति॥ ॥अधिकरणे बंधः॥ ४१॥ अधिकरणवाचिन्युपपदे बध्नातेर्धातोर्णमुल्
प्रत्ययो भवति। चक्रबंधं बध्नाति। कूटबंधं। मुष्टिबंधं। चोरकबंधं। चोरके बध्नातीत्यर्थः॥ ४२॥ संज्ञायां॥ ॥

संज्ञायां विषये बध्नातेर्धातोर्णमुल् प्रत्ययो भवति। क्रौंचबंधं बध्नाति। वांझलिकाबंधं। मयूरिकाबंधं। अट्टा
लिकाबंधं। बंधविशेषाणां नामधेयान्येतानि॥ ॥कर्त्रोर्जीवपुरुषयोर्नशिवहोः॥४३॥ जीवपुरुषयो
र्ययोरुपपदयोः कर्तृवाचिनोर्यथासंख्यं नशिवहोर्धात्वोर्णमुल् प्रत्ययो भवति। जीवनाशं नश्यति। जीवो नश्य
तीत्यर्थः। पुरुषवाहं वहति। पुरुषः प्रेष्यो भूत्वा वहतीत्यर्थः। कर्त्रोरिति किं। जीवेन नष्टः। पुरुषेणोढः॥ ॥
ऊर्ध्वे शुषिपूरोः॥४४॥ कर्तरि ग्रहणमनुवर्तते॥ ऊर्ध्वशब्दे कर्तृवाचिन्युपपदे शुषिपूर्योर्धात्वोर्णमुल् प्रत्ययो भवति।
ऊर्ध्वशोषं शुष्यति। ऊर्ध्वः शुष्यतीत्यर्थः। ऊर्ध्वपूरं पूर्यते। ऊर्ध्वः पूर्यत इत्यर्थः॥ ॥उपमाने कर्मणि च॥ उपमीयते
येन तदुपमानं। उपमाने कर्मण्युपपदे चकारात्कर्तरि च धातोर्णमुल् प्रत्ययो भवति। घृतनिधायं निहितः।
स्वर्णनिधायं निहितः। रत्नानिधाय घृतमिव निहित इत्यर्थः। रत्ननिधायं निहितः। कर्तरि खल्वपि। रजकना
शं नष्टः। रजक इव नष्ट इत्यर्थः। चटकनाशं नष्टः। कुक्कुटकनाशं नष्टः॥४६॥ कषादिषु यथाविध्यनुप्रयोगः॥ ८
॥ ॥निमूलसमूलयोः कषः इत्येतदारभ्य कषादयः तेषु यथाविध्यनुप्रयोगो भवति। यस्माद्धातोर्णमुल्

विहितः। स एवानुप्रयोक्तव्यः। धातुसंबंधे विधानात् अनुप्रयोगः सिद्ध एव। यथाविधिनियमार्थं वचनं। त
था चैवोदाहृतं॥ ॥उपदंशस्तृतीयायां॥४७॥ दंश दंशने। एतस्मादुपपूर्वात् तृतीयांत उपपदे णमुल् प्र
त्ययो भवति। मूलकोपदंशं भुंक्ते। मूलकेनोपदंशं भुंक्ते। आर्द्रकोपदंशं भुंक्ते। आर्द्रकेणोपदंशं भुंक्ते॥
विकल्पेनोपपदसमासः। तृतीयाप्रभृतीन्यन्यतरस्यामिति मूलकादिचोपदंशेः कर्म भुजेः करणं। सर्वत्र
चात्र णमुल्प्रकरणे क्रियाभेदे सति वा सरूपविधिना क्त्वाप्रत्ययो भवति। मूलकेनोपदिश्य भुंक्ते॥ ॥
हिंसार्थानां च समानकर्मकाणां॥४८॥ तृतीयायामित्येव। हिंसाप्राणपघातः। तदर्थानां धातूनां अ
नुप्रयोगधातुना समानकर्मकाणां तृतीयायां तु उपपदे णमुल् प्रत्ययो भवति। दंडोपघातं गाः कालयति।
दंडेनोपघातं। दंडेन ताडं। दंडताडं। समानकर्मकाणामिति किम्। दंडेनाहत्य चौरं गोपालको गाः का
लयति। सप्तम्यां चोपपीडरुधकर्षः॥४९॥ उपशब्दः प्रत्येकमभिसंबध्यते। उपपूर्वेभ्यः पीड। रुध। कर्ष।
इत्येतेभ्यो धातुभ्यः सप्तम्यंत उपपदे चकारात् तृतीयांत उपपदे णमुल् प्रत्ययो भवति। पार्श्वोपपीडं शेते।

पार्श्वयोरुपपीडं शेते। पार्श्वाभ्यामुपपीडं। व्रजोपरोधं गाः स्थापयति। व्रजे उपरोधं। व्रजेनोपरोधं। पाण्यु
पकर्षं धानाः संगृह्णाति। पाणावुपकर्षं। पाणिनोपकर्षं। कर्षतेरिह ग्रहणं न कृषतेः॥ ॥समासत्तौ॥ ५०॥
सप्तमी तृतीया चानुवर्त्तते। समासत्तिः सन्निकर्षः। समासत्तौ गम्यमानायां तृतीयासप्तम्योरुपपदयोर्धातो
र्णमुल्प्रत्ययो भवति। केशग्राहं युध्यन्ते। केशेषु ग्राहं। केशैर्ग्राहं। हस्तग्राहं युद्ध्यन्ते। हस्तेग्राहं। हस्तेन ग्राहं।
युद्धसंरंभादत्यन्तं सन्निकृष्य युद्ध्यन्त इति॥ ॥प्रमाणे च॥ ५१॥ तृतीयासप्तम्योरित्येव॥ प्रमाणमायामो
दैर्घ्यं। प्रमाणे गम्यमाने तृतीयासप्तम्योरुपपदयोर्धातोर्णमुल्प्रत्ययो भवति। द्व्यंगुलोत्कर्षं खण्डिकां
छिनत्ति। द्व्यंगुले उत्कर्षं। द्व्यंगुलेनोत्कर्षं। त्र्यंगुलेनोत्कर्षं। त्र्यंगुले उत्कर्षं। चतुरंगुलोत्कर्षं। चतुरं
गुले उत्कर्षं। चतुरंगुलेनोत्कर्षं॥ ॥अपादाने परीप्सायां॥ ५२॥ परीप्सा त्वरा। अपादान उपपदे
धातोर्णमुल्प्रत्ययो भवति। परीप्सायां गम्यमानायां। शय्योत्थायं धावति। शय्याया उत्थाय धावति १०
एवं नाम त्वरते यदवश्यकर्त्तव्यमपि नापेक्षते। शय्योत्थानमात्रमाद्रियते। ध्रापकर्षं यः पिबति। रं

भ्राष्ट्रापकर्षं। भ्राष्ट्रादपकर्षमपूपान् भक्षयति। भ्राष्ट्रापकर्षं। परीप्सायामिति किं। आसनादुत्थाय
गच्छति॥ ॥द्वितीयायां च॥ ५३॥ परीप्सायामित्येव। द्वितीयायां चोपपदे धातोर्णमुल्प्रत्ययो भवति।
परीप्सायां गम्यमानायां। यष्टिग्राहं युध्यन्ते। यष्टिं ग्राहं। लोष्टग्राहं। एवं नाम योद्धुं त्वरन्ते यदायुधग्रहणम
पि नाद्रियन्ते। लोष्टादिकं यत्किंचिदासन्नं तद्गृह्णन्ति। ॥५४॥ स्वाङ्गेऽध्रुवे॥ ॥द्वितीयायामित्येव। अध्रुव
स्वाङ्गवाचिन्युपपदे द्वितीयायां धातोर्णमुल्प्रत्ययो भवति। अक्षिनिकाणं जल्पति। भ्रूविक्षेपं कथ
यति। भ्रुवं विक्षेपं कथयति। अध्रुव इति किम्। उत्क्षिप्य शिरः कथयति। यस्मिन्नङ्गे छिन्नेऽपि प्राणी न म्रिय
ते तदध्रुवं॥ ॥परिक्लिश्यमाने च॥ ५५॥ स्वाङ्गे द्वितीयायामित्येव। परिक्लिश्यमाने स्वाङ्गवाचिन्युपपदे
द्वितीयायां णमुल्प्रत्ययो भवति। परिक्लेशः सर्वतो विबाधनं दुःखं। उरःप्रतिपेषं युद्ध्यन्ते। शिरःप्रतिपेषं युद्ध्यन्ते।
कृत्स्नमुरः पीडयन्तो युद्ध्यन्त इत्यर्थः॥ ॥ध्रुवार्थोयमानेन॥ ५६॥ विशिपतिपदिस्कन्दां व्याप्यमानासेव्यमा
नयोः द्वितीयायामित्येव। विशिपतिपदिस्कन्दिभ्यो धातुभ्यो द्वितीयायामुपपदे णमुल्प्रत्ययो भवति व्याप्यमाने।

का॰अ॰३पा॰५

२२७ आसेव्यमाने च गम्यमाने। विश्याद्दिनि। क्रियाभिरनवयवेन पदार्थानां संबंधो व्याप्तिः। आसेवा तात्पर्यं। प्र
ये व्याप्तिः। क्रियासासेवायां गेहानुप्रवेशमास्ते। समासेन व्याप्त्यासेवयोरुक्तत्वात्। नित्यवीप्सयोरिति द्वि
वचनं। भवति। असमासपक्षे व्याप्यमानतयाऽव्ययवचनस्य द्विर्वचनं। आसेव्यमानतायां तु क्रियावच
नस्य द्विर्वचनं। तथा च वक्ष्यति। सुस्नुवीप्सातऊहुनिमनेनि। गेहं गेहमनुप्रवेशमास्ते। गेहं गेहमनु
प्रवेशमनुप्रवेशमास्ते। गेहमनुप्रवेशमनुप्रवेशमास्ते। प्रतिगेहानुप्रपातमास्ते। गेहं गेहमनुप्रपात
मास्ते। गेहमनुप्रपातमनुप्रपातमास्ते। गेहं गेहमनुप्रपातमास्ते। पदैरप्येवमेव। स्कंधगेहावस्कंद
मास्ते। गेहं गेहमवस्कंदमास्ते। व्याप्यमानासेव्यमानयोरिति किं। गेहमनुदृष्टत्वात्तस्य द्वितीयोप
पदार्थं तर्हि विवक्षणम्। उपपदसमासः यद्येवं स्यात्। तेन हि सत्यमुपपदाभावः॥ ५७॥ ॥अस्यतितृषोः ११
क्रियान्तरे कालेषु। द्वितीयायामित्येव। क्रियामन्तरयतीति क्रियान्तरः। क्रियाव्यवधायकः। क्रियान्तरे
धात्वर्थे वर्तमानात् अस्यतेः तृषेश्च धातोः कालवाचिषूपपदेषु णमुल् प्रत्ययो भवति। अस्यति॥

द्व्यहात्यासं गाः पाययति। द्व्यहमत्यासं गाः पाययति। अहर्तर्षं गाः। पाययति। अहतर्षं गाः। पाययति।
अत्यसनेन च तर्षणेन च गवां पानक्रिया व्यवधीयते व्यवच्छिद्यते। अघपाययतित्वा द्व्यहमतिक्रम्य पुनः पाय
यतीत्यर्थः। अस्यतितृषोरिति किं। द्व्यहमुपोष्य भुंक्ते। क्रियान्तर इति किं। अहरत्यस्येषून् गतः। न गतिर्व्यव
धीयते (विवच्छिद्यते) काल इति किं। योजनमत्यस्य गाः पाययति। अध्वकर्मकमत्यसनं व्यवधायकं न
कालकर्मकं॥ ॥नाम्न्यादिशिग्रहोः॥ ५८॥ द्वितीयायामित्येव॥ नामशब्दे द्वितीयान्त उपपदे आदि
शिग्रहिभ्यां धातोर्णमुल् प्रत्ययो भवति। नामादेशमाचष्टे। नामग्राहमाकयति॥ ५९॥ अव्ययेऽयथाभि
प्रेताख्याने कृञः क्त्वाणमुलौ॥ ।द्वितीयायामित्येव। अव्यये उपपदे यथाभिप्रेताख्याने गम्यमाने करो
तेर्धातोः क्त्वाणमुलौ प्रत्ययौ भवतः। ब्राह्मण पुत्रस्ते जातः। किं तर्हि वृषल नीचैः कृत्वा चष्टे। नीचैः कृत्वा।
नीचैःकारं उच्चैर्नामप्रियमाख्येयं। ब्राह्मण कन्या ते गर्भिणी। किं तर्हि वृषल उच्चैः कृत्वा चष्टे। उच्चैः
कृत्वा। उच्चैःकारं। नीचैर्नामाप्रियमाख्येयं। अयथाभिप्रेताख्यान इति किं। उच्चैः कृत्वाचष्टे। उच्चैस्ते

का॰ अ॰ ३ पा॰ ४

२२८ ज्ञातः। स्वाग्रहणं किम्। यावता सर्वत्रैवात्र प्रकरणे रूपेण। स्वापि भवति त्वर्थं। समासार्थं वचनं तथा चस्वा
चेत्येतस्मिन् सूत्रे च्वितायाम् अतः स्मानुवर्त्तनेन णमुलधिकारे ऽनर्थमुलप्य ग्रहणं तुल्यकर्तृत्वज्ञापनार्थं। तेनो
ऽन्नत्र द्वयोरप्यनुवृत्तिर्भवति॥ ५९॥ ॥तिर्यच्यपवर्गे॥ ६०॥ तिर्यक्शब्दे उपपदे कृञः स्वा णमुलौ प्रत्ययौ
भवतः। अपवर्गे गम्यमाने। अपवर्गः परिसमाप्तिः। तिर्यक्कृत्य गतः तिर्यक्कृत्वा। तिर्यक्कारं। परिसमा
प्यगतः अपवर्ग इति किं। तिर्यक्कृत्वा काष्ठं गतः। तिर्यक्कृत्वा तिरश्चीनरूपानुकरणं। न च प्रकृतिवदनुक
रणं इति निवर्तितव्यं। अनुक्रियमाणरूपविनाशप्रसंगात्। एतद्दोषश्च। अदसो मादिनियमात्॥ ॥स्वा
ङ्गे तस्प्रत्यये कृभ्वोः॥ ६१॥ तस्प्रत्ययेयत्नः स्वाङ्गात्र इदेवमुच्यते। तस्प्रत्यये स्वाङ्गवाचिन्युपपदे कृभ्वोर्धा
त्वोः स्वाणमुलौ प्रत्ययौ भवतः। यथासंख्यमत्र नेष्यते। अस्वरितत्वात् मुखतः कृत्य गतः मुखतः कृत्वा
गतः। मुखतः कारं। पृष्ठतः कृत्य गतः पृष्ठतः कृत्वा गतः पृष्ठतः कारं। मुखतो भूय तिष्ठति। मुखतो भू १२
त्वा। मुखतो भावं। पृष्ठतो भूत्वा पृष्ठतो भूय। पृष्ठतो भावं। स्वाङ्ग इति किम्। सर्वतः कृत्वा गतः। तस्

का॰ अ॰ ३ पा॰ ५

२२७ ज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु तुमुन्॥ ६५॥ शकादिषूपपदेषु अस्त्यर्थेषु च धातुमात्र
भते भोक्तुं। प्रक्रमते भोक्तुं। सहते भोक्तुं। अर्हति भोक्तुं। अस्त्यर्थेष्वपि। अस्ति भोक्तुं। विद्यते भोक्तुं।
भवति भोक्तुं॥ ॥पर्याप्तिवचनेष्वलमर्थेषु॥ ६६॥ पर्याप्तिरन्यूनता। परिपूर्णता। पर्याप्तिवचनेष्वल
मर्थविशिष्टेषूपपदेषु धातोस्तुमुन्प्रत्ययो भवति। पर्याप्तो भोक्तुं। प्रभुर्भोक्तुं। पारयति भोक्तुं। पर्या
प्तिवचनेष्विति किम्। अलं भुक्त्वा। अलमर्थेष्विति किम्। पर्याप्तं भुंक्ते। पूर्वसूत्रे शक्यग्रहणमनेन
मर्थे। शक्यमेव वक्तुमिति॥ ॥कर्त्तरि कृतः॥ ६७॥ कृतसंज्ञकाः प्रत्ययाः कर्त्तरि कारके भवन्ति। कृ
दुत्पत्तिवाक्यानामयमपवादः। तत्र यद्यप्यर्थनिर्देशो नास्ति तत्रेदमुपतिष्ठते। अर्थाकांक्षत्वात्।
न स्तुनादिष्ववादेषु सावकाशाद्दर्थनिर्देशा समर्थिते षां निराकांक्षत्वात्। कारकः कर्त्ता नन्दनः ग्राही पचः।
॥ ॥भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा॥ ६८॥ भव्यगेयादयः शब्दाः कर्त्तरि १३
कारके वा निपात्यन्ते। तयोरेव कृत्यक्तखलर्था इति भावकर्मणोः प्राप्तयोः। कर्त्तर्यभावात् पदे कल्प्यते

तिकिम्। सुखी कृत्यगतः। प्रत्याय इति किम्। सुखेन स्पृतीति सुखनः सुखनः कृत्वा गतः॥ ॥नाधार्थप्रत
ये च्व्यर्थे॥६२॥ नाधार्थ्यश्च प्रत्ययो यस्मात् स एवमुच्यते। नाधार्थप्रत्ययान्ते शब्दे च्व्यर्थशब्द उपपदे कृ
ञो ध्वोर्न्वोः कारणानुलोमप्रत्ययौ न भवतः। आनाना नाना कृत्वा नाना कृत्य गतः। नाना कृत्वा नानाकारं।
विना कृत्य। विना कृत्वा विनाकारं। नाना भूय। नाना भूत्वा। नाना भावं। धार्थे द्विधा कृत्य द्विधा कृत्वा द्विधा
कारं द्विधा भूय द्विधा भूत्वा द्विधाभावं। द्वैधं कृत्य द्वैधं कृत्वा। द्वैधं कारं। द्वैधं भूय। द्वैधं भूत्वा द्विधं
भावं। द्वैधा कृत्य। द्वैधा कृत्वा द्वैधा कारं। द्वैधा भूय। द्वैधा भूत्वा द्वैधा भावं। प्रत्ययग्रहणं किं हिरुक्
कृत्वा हिरुक् कृत्वा। च्व्यर्थ इति किम्। नाना कृत्वा काष्ठानि गतः। धार्थमर्थग्रहणं नार्थं पुनरेकमेवेति
नञ्न्यायां नानानौ नमद्देशन्ति॥ ॥तूष्णीमि भुवः॥६३॥ तूष्णींशब्द उपपदे भुवस्तस्माद्धातोः कारणा
नुलोमप्रत्ययौ भवतः। तूष्णीं भूय। तूष्णीं भूत्वा। तूष्णींभावं। भूग्रहणं कृञो निवृत्त्यर्थं॥ ॥अन्वच्यानु
लोम्ये॥६४॥ अन्वक्शब्दे न वकत्तावं॥ ॥आनुलोम्य इति किं। अन्वक् भूत्वा तिष्ठति। पार्श्वतः।

न भवत्यसौ न भव्यः। भव्यमनेनेति वा। गेयो माणवकः साम्नां गेयानि माणवकेन सामानीति वा। प्रवचनीयो
गुरुः स्वाध्यायस्य प्रवचनीयः शिष्यो गुरोः। उपस्थानीयो गुरुः शिष्येति वा। जायतेऽसौ जन्यः। जन्यमने
नेति वा। आप्लावतेऽसौ वा प्लाव्यः। आप्लाव्यमनेनेति वा। आपात आपतत्यसौ वा पात्यः
आपात्यमनेनेति वा॥ ॥तः कर्मणि च भावे चाकर्मकेभ्यः॥६५॥ तकारेणेत्संज्ञकेनानुबंधः सामान्यमे
घटस्यमे। प्रथमा वक्तव्यचनेन वैतत्। तकाराः सकर्मकेभ्यो धातुभ्यः कर्मणि कारके भवंति। तकारान्तक
र्तरि च। अकर्मकेभ्यो धातुभ्यो भावे भवंति। पुनश्च कारात् कर्तरि। गम्यते ग्रामो देवदत्तेन। गच्छति ग्रा
मं देवदत्तः। अकर्मकेभ्यः आस्यते देवदत्तेन। आस्ते देवदत्तः। कर्मकेभ्यो भावे न भवंति॥७०॥ तयो
रेव कृत्यक्तखलर्थाः॥ ॥तयोरेव भावकर्मणोः कृत्यसंज्ञकाः प्रत्ययाः क्तप्रत्ययः खलर्थाश्च भवंति। ए
वकारः कर्तृरूपकर्षणार्थः। कर्मणि अनुभोक्तव्य ओदनो भवता। भावे। आसितव्यं भवता। शयित
व्यं भवता। क्तः कर्मणि। कृतः कटो भवता। भुक्त ओदनो भवता। भावे आसितं भवता। शयितं भवता।

वशस्त्वर्थाः क्तः कर्मणि। ईषत्कारः कटो भवता। सुकरः कटो भवता। दुष्करः कटो भवता। कर्त्तव्यः कटो भवता। भा
वे ईषदाढ्यंभवं भवता। भावे वा कर्मकेभ्य इति वर्त्तते। सकर्मकेभ्यो भावे न भवंति॥७१॥ आदिकर्मणि क्तः
कर्त्तरि च। आदिकर्मणि यः क्तः स कर्त्तरि भवति कर्त्तरि। चकाराद्यथाप्राप्तं च भावकर्म्मणोः। आदि
भूतः क्रियाक्षणः। आदिकर्म तस्मिन् आदिभूते कर्म्मणि भूतत्वेन विवक्षिते यः क्तो विहितस्तस्यायम
र्थनिर्देशः। प्रकृतः कटं देवदत्तः प्रकृतः कटो देवदत्तेन। प्रकृतं देवदत्तेन। प्रभुक्त ओदनं देवदत्तः
प्रभुक्त ओदनो देवदत्तेन। प्रभुक्तं देवदत्तेन॥ ॥गत्यर्थाकर्म्मकश्लिषशीङ्स्थासवसजनरुह
जीर्यतिभ्यश्च॥७२॥ गत्यर्थेभ्यो कर्मकेभ्यो धातुभ्यः श्लिषादिभ्यश्च यः क्तः स कर्त्तरि भवति चकाराद्य
थाप्राप्तं भावकर्मणोः। गतो देवदत्तो ग्रामं। गतो देवदत्तेन ग्रामः। गतं देवदत्तेन। अकर्मकेभ्यः ग्लानो भ
वान्। श्लिष। उपश्लिष्टो भवान् गुरुं। उपश्लिष्टो गुरुर्भवता। उपश्लिष्टं भवता। शीङ्। उपशयितो गुरुं भवान्। १४
उपशयितो गुरुर्भवता। उपशयितं भवता। स्था। उपस्थितो गुरुं भवान्। उपस्थितो गुरुर्भवता। उपस्थितं

भवता। आस। उपासितो गुरुं भवान्। उपासितो गुरुर्भवता। उपासितं भवता। उपसम्वितं भवता। व
स। अनुषितो गुरुं भवान्। अनूषितो गुरुर्भवता। अनूषितं भवता। जनु। अनुजातो माणवकं माणवि
काम्। अनुजातो माणवकेन माणविका। अनुजातं माणवकेन। रुह। आरूढो वृक्षं भवान्। आरूढो वृक्षो
भवता। आरूढं भवता। जीर्यति। अनुजीर्णो वृषलीं देवदत्तः। अनुजीर्णा वृषली देवदत्तेन। अनुजीर्णं
देवदत्तेन। श्लिषादयः सोपसर्गाः सकर्मका भवंति। तदर्थमेषामुपादानं॥७३॥ दाशगोघ्नौ संप्रदाने॥
दाशगोघ्नौ शब्दौ संप्रदाने कारके निपात्येते। दाशृ दाने। ततः पचाद्यच्। सकृत्वात्कर्त्तरि प्राप्तः संप्रदाने
निपात्यते। दाशंति तस्मै दाशः। आगताय तस्मै दातुं गां हंतीति गोघ्नोतिथिः। निपातसामर्थ्यादिह गोघ्नः
कल्पिगादिरुच्यते। न चाउणादिः। असत्यपि गोघ्नेन नेतयोग्यतया गोघ्न इत्यभिधीयते। भीमाद
योपादाने। भीमादयः शब्दा अपादानकारके निपात्यंते। उणादिप्रत्ययान्ते। स्याधस्तस्योमक निपः
तनेष्वमादयः। ता अयाम यत्र्योग्ये दयइति पर्युदासे यासे निपातनं। भामरस्यते भीमः। भाषः। भयानकः।

का॰ अ३ पा॰४

२३१ खरू: खरू: खरः। भूमा राज्ञः। संस्कारः। प्रस्कंदनः। प्रपतनः। सपुदस्तुवः सुकण्ठिः। प्रस्तः संस्करः सुरथः।
सुकः। मूर्खः। खलतिः॥ ॥ताभ्यामन्यत्रोणादयः॥७५॥ उणादिप्रत्ययास्ताभ्यां संप्रदानापादानाभ्याम
न्यत्र कारके भवंति। कृतत्वात्कर्तर्येव प्राप्ताः कर्मादिष्वपि कथ्यंते। संप्रदानार्थः। ताभ्यामिति प्रत्ययमर्षः।
अन्यथा पादानमेव परामृश्येत। अनंतरत्वात्। कृष्यते सोऽन्नमिति कृषिः। तन्यते तदिति तंतुः तंत्रं तदिति चर्म।
चरति तदिति चर्म॥ ॥क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः॥७६॥ ध्रौव्यार्थाः अकर्मकाः प्रत्यवसा
नार्था अभ्यवहारार्था इति स्वनिकायप्रसिद्धिः। ध्रौव्यगतिप्रत्यवसानार्थेभ्यो धातुभ्यो यः क्तः सोऽधिकरणे भ
वति चकाराद्यथाप्राप्तं च। तत्र ध्रौव्यार्थेभ्यः कर्तृभावाधिकरणेषु गत्यर्थेभ्यः कर्तृकर्मभावाधिकरणेषु
प्रत्यवसानार्थेभ्यः कर्मभावाधिकरणेषु ध्रौव्यार्थेभ्यस्तावत्। आसीतो देवदत्तः। आसीतं देवदत्तेन।
इदमेषामासीतं। गत्यर्थेभ्यः। यातो देवदत्तो ग्रामं। यातो देवदत्तेन ग्रामः। यातं देवदत्तेन। इदमेषां १५
यातं। प्रत्यवसानार्थेभ्यः। भुक्त ओदनो देवदत्तेन। इदमेषां भुक्तं। कथं भुक्ता ब्राह्मणाः पीता गाव इति।

अकारो मत्वर्थीयः। भुक्तमेषामस्ति। पीतमेषामस्तीति॥ ॥लस्य॥७७॥ लस्येत्ययमधिकारः। अकार उच्चा
रणार्थः। लकारमात्रं स्थानित्वेनाधिक्रियते। यदित ऊर्ध्वमनुक्रमिष्यामो लस्येत्येवं तद्वेदितव्यं। किंचेदं ल
स्येति। दशलकारा अनुबंधविशिष्टा विहिता अर्थविशेषे कालविशेषे च। तेषां विशेषकाननुबंधानुत्सृज्य
यत्सामान्यं तदत्र गृह्यते। षट्टितश्चत्वारो ङितः। अक्षरसमाम्नायवदानुपूर्व्या कथ्यंते। लट् लिट्
लुट् लेट् लोट् लङ् लिङ् लुङ् लृङ् एते दश लकारा इति। लकारमात्रस्येयं ग्रहणे कस्मान्न भवति। लुनी
तिः लः। धात्वधिकारात् कर्त्रादयश्च विशेषकाः॥७७॥ ॥तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथां
ध्वमिड्वहिमहिङ्॥७८॥ लस्य स्थाने तिबादय आदेशा भवंति। तिप्सिप्मिपां पकारः
स्वरार्थः इटष्टकारः। इटो दिति विशेषणार्थः। तिबादिनिर्देशे स्त्वेत्यत्वाच्छेदः शाविधृत्यर्थः। महिङो ङका
रः तिङिति प्रत्याहारग्रहणार्थः। पचति पचतः पचंति। पचसि। पचथः पचथ। पचामि पचावः पचामः।
पचते। पचेते। पचंते। पचसे। पचेथे। पचध्वे। पचे। पचावहे। पचामहे। इत्यादि। एवमन्येष्वपि लकारेषु

का॰अ॰३पा॰४
२३२

शहार्थे॥ ॥टित आत्मनेपदानां टेरे॥ ७९॥ टितो लकारस्य आत्मनेपदानि विहितानि तेषां टेरेकारादेशो
भवति। तथा वैधे। दाहूतं। इह कस्मान्न भवति। पचमानो पक्षमाण इति। प्रकृतेत्ति वादिनि आत्मनेपदं वि
शेष्यते॥ ॥थासः से॥ ८०॥ टित इत्येव। टितो लकारस्य यस्थास् तस्य से इत्ययमादेशो भवति। पचसे। पचि
षे। पक्ष्यासे। पक्ष्यसे॥ ॥लिटस्तझयोरेशिरेच्॥ ८१॥ लिडादेशयोस्तझयोर्यथासंख्यं एश् इरेच् इत्ये
तावादेशौ भवतः। शकारः सर्वादेशार्थः। चकारः स्वरार्थः। पेचे। पेचिरे। लेभे। लेभिरे॥ ॥परस्मैपदानां
णलतुसुस्थलथुसणल्वमाः॥ ८२॥ लिट इत्येव। लिडादेशानां परस्मैपदसंज्ञकानां तिबादीनां यथासंख्यं
णलादय आदेशा भवंति। लकारः स्वरार्थः। णकारो वृद्ध्यर्थः। पपाच। पेचतुः। पेचुः। पेचिथ पपक्थ। पेचथुः।
पेच। पपाच। पपच। पेचिव। पेचिम॥ ॥विदो लटो वा॥ ८३॥ परस्मैपदानामित्येव। विद ज्ञाने। अस्माद्धातोः
परस्य लटः। आदेशानां परस्मैपदसंज्ञकानां नवानां णलादयो नव आदेशा भवंति। वेद विदतुः विदुः। वे
त्थ। विदथुः। वेद। विद। विद्व। विद्म। न च न भवति। वेत्ति वित्तः। विदंति इत्यादि॥ ८४॥ ब्रुवः पंचानामादित आ ३६

हो ब्रुवः॥ ॥परस्मैपदानामित्येव लट इत्येव। वेत्ति ब्रुवः परस्य लटः। आदेशानां पंचानामादितस्तानां पर
स्मैपदसंज्ञकानां पंचैव णलादय आदेशा भवंति। स्थानिवंधात् आदेशोपि पंचानामादित्वं च विज्ञायते। तत्स
न्नियोगेन च ब्रुवश्च आह इत्ययमादेशो भवति। आहः थ इति ज्ञापकात् आहादेशोकार उच्चारणार्थः। आह।
आहतुः। आहुः। आत्थ। आहथुः। न भवति। ब्रवीति ब्रूतः। ब्रुवंति। ब्रवीषि। ब्रूथः। पंचानामिति किम्। ब्रूथ।
ब्रवीमि। ब्रूवः। ब्रूमः। आदित इति किं॥ परेषां मा भूत्। ब्रुव इति पुनर्वचनं स्थान्यर्थं परस्मैपदानामे
व हि स्यात्॥ ॥लोटो लङ्वत्॥ ८५॥ अतिदेशोयं। लोटो लङ्वत्कार्यं भवति। तामादयः सलोपश्च।
पचतां। पचतं। पचत। पचाव। पचाम। अडागमः कस्मान्न भवतः। तथा ङेऽडुपादेषम्। यान्तु। वान्तु। लङः
शाकटायनस्यैवेति। वा यह लमनुवर्तते। सा व्यवस्थितविभाषा भविष्यति॥ ॥एरुः॥ ८६॥ लोट इ
त्येव॥ लोडादेशानामिकारस्य उकारादेशो भवति। पचतु पचंतु। हिन्योरुत्वप्रतिषेधार्थः लघूच्चारणसा
मर्थ्यात्। अथवा वेति वर्तते। सा च व्यवस्थितविभाषा॥ ॥सेर्ह्यपिच्च॥ ८७॥ लोट इत्येव॥ लोडादे

का॰अ॰३पा॰
२३३

रास्य सेर्हिरादेशो भवति। सोपिच्च भवति। स्थानिवद्भावात्पित्त्वं प्राप्तं प्रतिषिध्यते। लुनीहि। पुनीहि। राध्नुहि। त-
क्ष्णुहि॥ ॥वाछंदसि॥८५॥ अपितं विकल्प्यते। नादेशः छंदसि विषये हिशब्दो वा अपिच्च किं। भवति। यु-
युयोध्यस्मज्जुहुराणमेनः। युयुधि। अकृधि। जुहोधि। प्रीणाहि। प्रीणाहि॥ मेर्निः। लोट इत्येव। लोडादेश-
स्य मेर्निरादेशो भवति। उत्वलोपयोरपवादः। पचानि। पठानि॥ ॥आमेतः॥९०॥ लोट इत्येव॥ लोट्-
संबंधिन एकारस्याम् इत्ययमादेशो भवति। पचतां। पचेतां। पचंतां॥ सवाभ्यां वामौ॥ लोट इत्येव। एत इति समस्त-
स्य एकारान्त्यस्य पुत्तरस्य लोट्संबंधिन एकारस्य यथासंख्यं व अम इत्येतावादेशौ भवतः। आमोपवादः। पचस्व।
पचध्वं॥ ॥आडुत्तमस्य पिच्च॥ ॥लोट इत्येव। लोट्संबंधिन उत्तमपुरुषस्य आडागमो भवति। स च
उत्तमपुरुषः पिच्च भवति। करवाणि। करवाव। करवाम। करवै करवावहै। करवामहै॥ ॥एत ऐ॥९३॥ ॥
लोट उत्तमस्येति वर्त्तते। लोट्संबंधिन उत्तमपुरुषस्य एकारस्य ऐकारादेशो भवति। आमोपवादः। कर- भु
वै करवावहै। करवामहै। इह कस्मान्न भवति। पचावेदं। पचामेदं। बहिरंगलक्षणत्वादुत्तमस्य॥ ॥

लेटोऽडाटौ॥९४॥ लेटः अडाटावागमौ भवतः। पर्यायेण। जोषिषत्। तारिषत्। मंदिषत्। पताति दिद्युत्। उ-
दधिं च्यावयाति। आत ऐ॥९५॥ लेट इत्येव। लेट्संबंधिन आकारस्य ऐकारादेशो भवति। प्रथममध्यमपुरु-
षात्मनेपदद्विवचनयोः। मंत्रयैते। मंत्रयैथे। करवैते। करवैथे। आटः कस्मान्न भवति। विधानसामर्थ्यात्।
पचावेदम्। पचामेदम्॥ ॥वैतोऽन्यत्र॥९६॥ लेट इत्येव। लेट्संबंधिन एकारस्य ऐकारादेशो भवति॥
इतः अन्यत्रेति। अनंतरो विधिरपेक्षितो। आत ऐ इत्येन द्विषयं वर्जयित्वा एतदेशो भवति। अहमेव पशूनामीशै।
सप्ताहानि शासै। मदग्रा एव वोग्रहा गृह्यान्तै। मद्देवत्यान्येव पात्राण्युच्यान्तै। न च भवति। यत्र क्व च ते मनो दक्षं
दधस उत्तरं। अन्यत्रेति किम्। मंत्रयैते। मंत्रयैथे॥ ॥इतश्च लोपः परस्मैपदेषु॥९७॥ लेट इत्येव। लेट्सं-
बंधिन इकारस्य परस्मैपदविषयस्य लोपो भवति। वेति चानुवर्त्तते। पक्षे श्रवणमपि भवति। जोषिषत्। ता-
रिषत्। मंदिषत्। न च भवति। पताति दिद्युत्। उदधिं च्यावयाति। परस्मैपदग्रहणं मिङ्कहिमहिङामानत्।
॥ ॥स उत्तमस्य॥९८॥ लेट इत्येव। लेट्संबंधिन उत्तमपुरुषस्य सकारस्य वा लोपो भवति। करवाव

करवाम॥नवभवति।करवाव।करवाम।उत्तमग्रहणंकिं।प्रथममध्यमपुरुषयोर्माभूत॥९५॥नित्यंङितः॥
ङितोलकारस्यउत्तमपुरुषस्यनित्यंसकारस्यलोपोभवति।अपचाव।अपचाम।नित्यग्रहणंविकल्प
निवृत्त्यर्थं॥ ॥इतश्च॥१०॥ङितःलकारसंबंधिनइकारस्यलोपोभवति।नितं।अपचत्।अपाक्षीत्॥
परस्मैपदेष्वित्येव॥अपचावहि।अपचामहि॥ ॥तस्थस्थमिपांतांतंतामः॥१॥ङित इत्येव।ङितःलका
रसंबंधीनांतसादीनांचतुर्णांयथासंख्यंतां-तं-त-अम्-इत्येतेआदेशाभवंति।अपचतां।अपच
तं।अपचत।अपचं।अपाक्तां।अपाक्तं।अपाक्त।अपाक्षं॥ ॥लिङःसीयुट्॥२॥लिंगादेशानां
सीयुडागमोभवति।टकारोदेशविपर्ययः।उकारउच्चारणार्थः।पचेत्।पचेयातां।पचेरन्।पक्षीष्ट॥
पक्षीयास्तामपक्षीरन्॥ ॥यासुट्परस्मैपदेषूदात्तोङिच्च॥३॥लिङ् इत्येव।परस्मैपदविष
यस्यलिङोयासुडागमोभवति।सीयुटोपवादः।सचोदात्तोङिद्भवति।आगमानुदात्तत्वेप्राप्तेउ १८
दात्तत्वंविधीयते।ङित्वंचुखिङ्एवविधीयते।तत्रतत्रकार्याणिसंभवात्।नागमस्य।कुर्यात्

कुर्यातां।कुर्युः।स्थानीवद्भावादेवलिङादेशस्यङित्वेसिद्धेयासुटोङिद्वचनंज्ञापकार्थं।तकाराश्रयंङि
त्वंआदेशानांनभवतीति।अविभवं।अभूनव॥ ॥किदाशिषि॥४॥आशिषिविषयेयोलिङ्त
स्ययासुडागमोभवति।सकिद्भवति।प्रत्ययस्यैवकित्वंनागमस्यप्रयोजनाभावात्।ङित्वेप्राप्तेकित्वं
विधीयते।गुणप्रतिवृद्धिप्रतिषेधस्तत्प्रयोजनं।संप्रसारणे।आयोविविणात्।ङितःस्वितिजागर्त्तेर्गुणेऽवविशेषः।
इज्यात्।इज्यास्तां।इज्यासुः।जागर्यात्।जागर्यास्तां।जागर्यासुः।आशिषीतिकिम्॥वच्यात्।जागृयात्।
कस्यरत्॥५॥लिङ इत्येव।लिङादेशस्यपरस्यद्वितीयपमाहेशोभवति।पचेय।यजेय।कृषीय।
कृषाय।तकारस्येत्संज्ञाप्रतिषेधःप्राप्नोति।नविभक्तौतुस्मा इति।नैवायमादेशावयवस्तकारः।
किंतर्हिमुखसुखार्थमुच्चार्यते।आगमस्येतोग्रहणंनभवति।अर्थवद्ग्रहणेनानर्थकस्येति॥ ॥
सुट्तिथोः॥७॥लिङइत्येव।लिंगस्य।संबंधिनोस्तकारथकारयोःसुडागमोभवति।तकारथकारा
वागमिनौ।लिङ्चुतद्विशेषणं।तकारेइकारउच्चारणार्थः॥सीयुटस्तुलिङेवागमी।तेनानिष्ठवि

५१

षपत्वात्सुटाबाधान्न भवति। कृषीष्ट। कृषीयास्तां। कृषीष्ठाः कृषीयास्थां॥ ॥ झेर्जुस्॥ ८ ॥ लि
ङ्गित्येव। लिङादेशस्य झेर्जुसादेशो भवति। झोन्तापवादः। पचेयुः यजेयुः॥ ९ ॥ सिजभ्यस्तविदिभ्यश्च।
अलिङर्थ आरम्भः। सिचः परस्मादभ्यस्तसंज्ञकेभ्यो वेत्तेश्च परस्य ङित्कारसंबंधिनो झेर्जुसादेशो
भवति। अन्तादेशे प्राप्ते अभ्यस्ताविदिग्रहणमसिजर्थं। ङिद्ग्रहणं नानुवर्तते। सिचस्तावत्।
अकार्षुः अहार्षुः। अभ्यस्तात्। अजिह्युः। अबिभयुः। अजागरुः। विदः। अविदुः॥ १० ॥ आतः॥
सिज्ग्रहणमनुवर्तते। सिच आकारान्ताच्च परस्य झेर्जुसादेशो भवति। कथमन्यपामानन्तर्ये। सिज्लु
कि कृते प्रत्ययलक्षणेन सिचोनन्तरः कृत्याद्आकारादिति। अदुः अधुः अस्थुः। अगुः। अपुः प्रतिषिध्यते।
लुग्ग्रहणाद्यपि कृत्वा नियमस्य ह्रस्वमार्गे सिचि भवत्येव। अकार्षुः। अहार्षुः॥ ॥ लङः शाकटा
यनस्यैव॥ ११ ॥ लङ इत्येव॥ ॥ आकारान्तादङ्गादुत्तरस्य लङादेशस्य झेर्जुसादेशो भवति। १५
शाकटायनस्याचार्यस्य मतेन अयुः अवुः। अन्येषां मते। अयान् अवान्। ननु च ङिन्नित्यनुवर्तते।

तत्र लङादेशस्याकारादनन्तरो ङित्संज्ञको भवति। नान्यः। ततः किं लङ्ग्रहणेन एवं तर्हि सिंजेरयो लङस्तस्य
यथा स्यात्। लङ्वद्भावेन यस्तस्य मा भूत्। जोटो लङ्वदिति। यांतु। वांतु। सिजभ्यस्तविदिभ्यश्च
त्ययमपि जुस्। जोटो न भवति। बिभ्यतु। जाग्रतु। विदन्तु। जुस्भावमात्रं हि मुख्ये न लङा विशेष्यते। एव
कारश्चार्थः॥ द्विषश्च॥ लङः शाकटायनस्यैवेत्येव द्विषः परस्य झेर्जुसादेशो भवति। शाकटायनस्याचा
र्यस्य मतेन। अद्विषुः। अन्येषां मते। अद्विषन्॥ तिङ्शित्सार्वधातुकं॥ तिङः शितश्च प्रत्ययाः सार्वधा
तुकसंज्ञा भवंति। तरति भवति। रोदिति स्वपिति। पचमानो यजमानः। सार्वधातुकप्रदेशाः सार्वधातु
के यगित्येवमादयः। आर्धधातुकं शेषः॥ तिङः शितश्च वर्जयित्वा योन्यो धातुविहितः प्रत्ययः धातुसंशब्द
नेन विहितः स शेष आर्धधातुकसंज्ञो भवति। लविता। लवितुं। लवितव्यं। धातोरित्येव। वृक्षत्वं। वृक्षता।
लूभ्यां लूभिः। जुगुप्सते। लिट् च॥ लिडादेशस्तिङार्धधातुकसंज्ञो भवति। सार्वधातुकसंज्ञापवादः। पे
चिथ। शेकिथ। जग्ले। मम्ले। ननु च एकसंज्ञाधिकारादन्यत्र संज्ञासमावेशोस्ति। सत्यं। ईहत्वेवकारा

का॰ अ३ पा४

१५

२३६ नुवर्त्तते। स नियमं करिष्यति। आर्द्धधातुकमेवेति लिङाशिषि॥ आशिषि विषये यो लिङ् विहितस्तदादेशस्ति
ङ् आर्द्धधातुकसंज्ञो भवति। सार्वधातुकसंज्ञापवादः। तेनाभावेशप्स्वेवकारानुवृत्ते र्न भवति। पविरिषीष्ट। आ
शीषीष्ट। आशिषीति किम्। लुनीयात्। छन्दस्युभयथा॥ छन्दसि विषये उभयथा भवति। वर्द्धन्तु त्वा सुष्टु
तयः। आर्द्धधातुकत्वाण्णिलोपः। वर्द्धयन्तीति प्राप्ते। शेषस्य सार्वधातुकं। स्वस्तये तार्क्ष्यमिह रुहेम। क्ङितः
सार्वधातुकत्वादस्तेर्भूभावो न भवति। लिट् सार्वधातुकं। ससृवांसो विशृण्विरे। सोममिन्द्राय सुन्विरे।
श्नुप्रत्ययो भवति। उपस्थेयाम शरणा बृहन्ता। सार्वधातुकत्वाद् ध्रिङ्गः सलोपः। आर्द्धधातुकत्वादेत्वं।
व्यत्ययो बहुलमित्यस्यैवायं प्रपंचः॥ १७॥ श्रीः॥ इति श्रीवैयाकरणवर्यश्रीमदुपाध्यायवामनकृतायां
काशिकायां वृत्तौ तृतीयस्याध्यायस्य चतुर्थः पादः समाप्तः॥ ॥श्रीः॥ ॥पादेऽस्मिन् १२
सूत्र ११७ तृतीयाध्यायस्य समस्त सूत्रसंख्या ६३१॥ ॥ ॥ श्रीः॥ ॥ श्रीः॥
तेरषकपाठकस्योक्तु मंगलं भवतु॥ ॥संवत् १७४५ वर्षे चैत्र शुदि १० भानौ लेखः॥ ॥ श्रीः॥ २०